# "धनुश्शास्त्रीया चित्रवेधपरम्परा"

Dr Satyanarayan
Assistant Professor
Shaheed Smarak Govt. PG College Tigaon
satyanarayan700@gmail.com

## शोध-सारः

धनुर्वेदः प्राचीनभारतस्य आत्मरक्षा तथा युद्धविषयकविद्यायाः प्रतिनिधित्वङ्करोति । |युद्धस्य नीतिशास्त्रम्, सैन्यसञ्चालनम्, सैन्यसंबंधीव्याकरणमादयः बहवः विषयाः शास्त्रेऽस्मिन् प्रतिपादिताः । प्रसिद्धेष्वुपवेदेषु वेदोऽयं यजुर्वेदीयोपवेदोऽस्ति, प्राचीनसमये धनुषः युद्धेषु प्राधान्याद् धनुर्वेदनाम्ना च प्रथितो बभूव । धनुर्वेदसंज्ञया अभिहितेनानेन अन्यानि शास्त्राणि तथैव पाल्यन्ते स्म यथा परिखया उद्यानं पाल्यते । साहित्ये विलुप्ते सति शास्त्रस्यास्य महती क्षति सञ्जाता तद्विषये लोके भ्रान्तयश्च प्रचलिताः अभूवन् । जनैः सामान्तया चिन्तितं यत् धनुषः ज्ञानमेव धनुर्वेदविषयत्वम्, अथ वा शस्त्रास्त्राणां ज्ञानमात्रमेव अनेन दीयते । वर्तमानकाले तु न तान्यस्त्राणि प्रयुज्यन्ते, अतो किमर्थं धनुश्शास्त्रस्य पठनं पाठनञ्च कर्तव्यम् । पत्रेऽस्मिन् अवधीरणैषा प्रतिक्षिप्यते, अथ चोपसंह्रियते यत् अन्येऽपि बहवः लोकोपयोगिनः विषयाः धनुश्शास्त्रे सन्ति येषामुपयोगः युद्धादन्येषु क्षेत्रेषु कर्तुं शक्यते । एतेभ्यः विषयेभ्यः एकोऽस्ति चित्रवेधः, यमधिकृत्य लिखितमिदं पत्रम् ।

विचित्राणां लक्ष्याणां वेधः चित्रवेधः कथ्यते । अनया वेधविचित्रतया वेधोऽयं चित्रवेधतामाप्नोति । मानसोल्लासे चित्रस्य परिभाषा एवं प्रदत्ता अस्ति – 'चित्रं कुतुहलकरं प्रेक्षकाणां मनोहरम्'[1] । अस्य चित्रताकारणाद् नायं युद्धे प्रयोगार्हः अपित्वनुरञ्जनं लोकानामनेन सिध्यते । अतः प्रतियोगितासु तथा स्वयंवरादिष्वयं बहुधा प्रयुज्यते । एवञ्च राज्ञैः राजकुमारादिभिश्च स्वपत्नी-प्रेमिकादीनां समक्षेऽपि चित्रवेधानां प्रदर्शनं क्रियते । अयं चित्रवेधः बहुरूचिकरः किन्तु कष्टसाध्यः भवति । प्रमुखाः चित्रवेधाः एते सन्ति -

१. राधावेधः २. खर्जूरीवेधः ३. पत्रवेधः ४. यमलार्जुनवेधः ५. विकटार्जुनवेधः ६. अर्धचन्द्राह्वयवेधः ७. मालाविद्याधरवेधः ।

एतेषु वेधेषु राधावेधस्तु द्रौपद्याः स्वयंवरे प्रयुक्तोऽऽसीत्, तस्मादेव कारणाद् संभवतः राधावेधनाम्ना प्रसिद्धोऽभूत् । यद्यपि वर्तमानकाले युद्धानां स्वरूपं परिवर्तितमस्ति । प्राचीनकाले यथा समक्षं भूत्वा युद्धं क्रियते स्म तथा अद्य न भवितुमर्हति । तथापि प्रतियोगितासु चित्रवेधानां प्रयोगः भवितुमर्हति ।

---
[1] वशिष्ठधनुर्वेदसंहिता २/५३. संपा. शास्त्री, द्वारकाप्रसाद. प्८५.

एतेषामतिरिक्तं शब्दवेधित्वमपि वर्तमानकाले प्रतियोगितादिसु प्रयोक्तुं शक्यते। अस्मिन् वेधे न लक्ष्यं दृश्यते अपितु ध्वनिमात्रं धन्विना श्रूयते । ध्वनिना एव लक्ष्यं चिन्तयित्वा वेध्यते । शब्दवेधस्योदाहरणन्तु रामायणे श्रवणवधप्रसंगे वर्णितमस्ति यत्र राज्ञा दशरथेन श्रवणः जलभरणकाले घटकृतशब्दं बालहस्तिनः अनुमान्य हतः।

एतेषां चित्रवेधानां संक्षिप्तवर्णनं तेषां वर्तमानकाले प्रासंगिकता चैतस्मिन् प्रपत्रे प्रतिपादिता अस्ति।

**कूटशब्दाः**

धनुश्शास्त्रम्, चित्रवेधः, संग्रहः, सिद्धप्रयोगः, बाणभङ्गः, करावर्तः, बाणच्छेदी, काष्ठभेदनम्, बिन्दुकम्, गोलकयुग्मम्, चित्रयोधा, राधावेधः, खर्जूरीवेधः, नाराचः, नालिकम्, पत्रवेधः, वृषलः, यमलार्जुनवेधः, विकटार्जुनवेधः, अर्धचन्द्राह्वयः, मालाविद्याधरः, शब्दवेधः,

## "धनुश्शास्त्रीया चित्रवेधपरम्परा"

धनुर्वेदस्य मूलसाहित्यं यद्यपि विनष्टमभवत् तथाप्यनेकेषु ग्रन्थेषु अस्योद्धरणानि प्राप्यन्ते। एतेष्वुद्धरणेषु धनुश्शास्त्रस्य अत्यन्तप्राचीना समृद्धा च परम्परा सम्मुखी भवति । अस्याः ज्ञानपरम्परायाः उद्भवः विकासश्च केषुचित् अर्वाचीनग्रन्थेषु समुपलभ्यते। उपलब्धेषु एतेषु ग्रन्थेषु शास्त्रोऽयं चतुर्धा विभक्तोऽस्ति -

१. दीक्षाप्रकारः

२. संग्रहः

३. सिद्धप्रयोगाः

४. प्रयोगविधयः

धनुषः प्राधान्याद् वेधस्त्वस्ति महत्त्वपूर्णः विषयः धनुर्वेदस्य । विचित्राणां लक्ष्याणां वेधः चित्रवेधः कथ्यते। अनया वेधविचित्रतया वेधोऽयं चित्रवेधतामाप्नोति। मानसोल्लासे चित्रस्य परिभाषा एवं प्रदत्ता अस्ति – 'चित्रं कुतुहलकरं प्रेक्षकाणां मनोहरम्'[2] ।

अयं चित्रवेधः उपर्युक्तेषु भागेषु चतुर्थे पादे स्वीकर्तव्योऽस्ति। यतः चित्रवेधे प्राचीनाः कृताः प्रयोगास्तु गण्यन्त एव नावीन्यमपि महेष्वासैः सर्वदान्विष्यते । अस्य चित्रताकारणाद् नायं युद्धे प्रयोगार्हः अपित्वनुरञ्जनं लोकानामनेन सिध्यते। अतः प्रतियोगितासु तथा स्वयंवरादिष्वयं बहुधा प्रयुज्यते। एवञ्च राज्ञैः राजकुमारादिभिश्च स्वपत्नी-प्रेमिकादीनां समक्षेऽपि चित्रवेधानां प्रदर्शनं क्रियते। अयं चित्रवेधः बहुरूचिकरः किन्तु कष्टसाध्यः भवति।

---

[2] वशिष्ठधनुर्वेदसंहिता २/५३. संपा. शास्त्री, द्वारकाप्रसाद. प. ८५

चित्रवेधः धनुश्शास्त्रे बहुधा वर्णितोऽस्ति । अस्य प्रमुखाः पञ्चप्रकाराः वाशिष्ठधनुर्वेदे इत्थं वर्णितास्सन्ति -

१. बाणभङ्गः -

बाणभङ्गे बाणेन एव अपरस्य बाणस्य भङ्गः विधीयते । अत्र येन बाणेन भज्यते सः द्विफलयुक्तः भवति, अनेन द्विफलयुक्तेन बाणेन लक्ष्यस्थाने स्थितः बाणः यदा कर्त्यते तदोच्यते बाणभङ्गचित्रवेधः ।

लक्ष्यस्थाने धृतं काण्डं सम्मुखं छेदयेत्ततः ।
किञ्चिद् सृष्टिं विधाय स्वां तिर्यग् द्विफलकेषुणा ॥[3]

२. करावर्त्तः -

अन्येन धन्विना मुञ्चितं बाणं स्वयं किञ्चिद् विक्रीभूय आकाश एव यदा धन्वी कर्तयति, तदोच्यते करावर्त्तः । योऽयं साधयति सः बाणच्छेदी उच्यते ।

सम्मुखं बाणमायान्तं तिर्यग् बाणं न सञ्चरेत् ।
प्राज्ञः शरेण यश्छिन्द्याद् बाणच्छेदी स उच्यते ॥ [4]

३. काष्ठभेदनम् -

काष्ठभेदनं द्विधा कथितमस्ति । काष्ठखण्डस्याग्रभागे अश्वकेशेन बद्धां अन्येन जनेन भ्राम्यमाणां वराटिकाम् यदा वेध्यते अयमेकः प्रकारः काष्ठभेदस्य उच्यते । येन च धन्विना अयं वेधः साध्यते सः धनुर्धरः उच्यते । यथा वर्णितम् शास्त्रे -

काष्ठे अश्वकेशं संयम्य तत्र बध्वा वराटिकाम् ।

---

[3] वशिष्ठधनुर्वेदसंहिता २/५३. संपा. शास्त्री, द्वारकाप्रसाद. पृ. ३३.
[4] तत्रैव, २/५४

हस्तेन भ्राम्यमाणं च यो हन्ति सो धनुर्धरः ॥[5]

अपरमपि एकं काष्ठभेदनं कथ्यते, यस्मिन् लक्ष्यस्थाने गोपुच्छाकृतिम् आर्द्रकाष्ठं संस्थाप्य क्षुरप्रेण इषुणा कृतः तस्य वेधः काष्ठभेदनाम्ना ज्ञायते, तथा सः धन्वी 'काष्ठभेदी' उच्यते ।

लक्ष्यस्थाने न्यसेत्काष्ठं सार्द्रं गोपुच्छसन्निभम् ।

यश्छिन्द्यात्तत् क्षुरप्रेण 'काष्ठभेदी' स जायते ॥[6]

४. बिन्दुकम् -

लक्ष्यस्थाने बन्धूकपुष्पसदृशं शुभ्रं बिन्दुं संस्थाप्य तं बिन्दुं यः वेधयति सः 'चित्रयोधा' उच्यते, तदा तद् वेधनमुच्यते 'बिन्दुकम्' ।

लक्ष्ये बिन्दुं न्यसेच्छुभ्रं शुभ्रबन्धूकपुष्पवत् ।

हन्ति तं बिन्दुकं यस्तु चित्रयोधा स उच्यते ॥[7]

५. गोलकयुग्मम् -

यदा कोऽपि जनः दूरे समीपे वा भूत्वा काष्ठयुग्मं आकाशे क्षेपयति, तदा धन्वी द्वाभ्यां शीघ्रसन्धायिताभ्यां बाणाभ्यां तयोः क्षिप्तयोः काष्ठयोः वेधः करोति, अथवा एकेनैव गोपुच्छबाणेन उभयोः वेधनं करोति, तदा उच्यते 'गोलकयुग्मम्' चित्रवेधः । एषः चित्रवेधकः सर्वैः पार्थिवैः पूजनीयः भवति, इत्युक्तम् शास्त्रे ।

काष्ठगोलयुग्मं क्षिप्रं दूरमूर्ध्वं पुरा स्थितैः ।

असम्प्राप्तं शरं पृष्ठे तद्गोपुच्छमुखेन हि ॥

यो हन्ति शरयुग्मेन शीघ्रसन्धानयोगतः ।

स स्याद्धनुर्भृतां श्रेष्ठः पूजितः सर्वपार्थिवैः ॥[8]

---

[5] वशिष्ठधनुर्वेदसंहिता २/५५. संपा. शास्त्री, द्वारकाप्रसाद. पृ. ३३

[6] तत्रैव, २/५६.

[7] वशिष्ठधनुर्वेदसंहिता २/५७. संपा. शास्त्री, द्वारकाप्रसाद. पृ. ३४

[8] तत्रैव, २/५८-५९.

एतेषां विधीनामतिरिक्तं मानसोल्लासे अन्येऽपि विधयः वर्णिताः सन्ति । एते विधयः वशिष्ठधनुर्वेदे वर्णितेभ्यः विधिभ्यः भिन्नाः अधोकविचित्राश्च सन्ति । एतेषां विस्तृतं वर्णनम् इत्थम् अस्ति –

१. राधावेधः -

राधावेधस्य प्रयोगः द्रौपदीस्वयंवरे कृतम् आसीत् । द्रौपद्याः राधा अपि संज्ञा महाभारते उक्ता अस्ति । अतः संभवतः तस्माद् कारणादयं 'राधावेधः' इति नाम्ना प्रसिद्धोऽभवत् । वेधेऽस्मिन् एकस्मिन् स्तम्भे भ्रमितं चक्रयन्त्रं स्थाप्य तस्मिन् चक्रे च मत्स्यं संयोज्यते । अस्य अधः भूमौ स्थापिते जलपात्रे दृष्ट्वा मत्स्याक्षवेधनं करणीयं भवति । अयं वेधः राधावेध उच्यते । अर्जुनेन एनं वेधं वेधयित्वा द्रौपद्याः पाणिग्रहणं कृतम् ।

स्तम्भस्योपरि विन्यस्तचक्रयन्त्रे सुकीलितम् ।
वायुप्रेरितपत्रैस्तु भ्राम्यमाणं द्रुतं झषम् ॥
पात्रमध्ये स्थिते तोये वीक्ष्य विध्यन् विलोचने ।
प्रत्यालीढस्थितो राजा राधावेधं प्रदर्शयेत् ॥[9]

२. खर्जूरीवेधः -

खर्जूरीवेधे काष्ठस्य एकं वृक्षनिर्माणं क्रियते । अस्य वृक्षस्य आकृतिः खर्जूरी सदृशी भवति । खर्जूरीवत् काष्ठस्य तरुं निर्माय तस्य काष्ठवृक्षस्य वेधनं नाराचैः एवं क्रियते येन बाणैः तस्य खर्जूरस्य पत्राणां फलानाञ्च प्रतीतिः भवेत् । अयमुच्यते खर्जूरीवेधः, यस्य प्रदर्शनं राज्ञा प्रेयसीनां समक्षे क्रियते ।

खर्जूरी सदृशकारं कृत्वा दारुमयं तरुम् ।
नाराचैः शतशो विध्येत् स्थाने कण्टकपत्रयोः ॥[10]

[9] धनुर्वेदः, आचार्य, देवव्रत, पृ. ८४.
[10] तत्रैव, पृ.८६.

३. पत्रवेधः / पत्रच्छेदः –

कमपि शूद्रं सम्मुखीकृत्य तस्य वक्षभागे स्थापितं पत्रं राजा बाणेन एव उत्थापयेद्, एषः वेधः पत्रवेध उच्यते। अनेन पत्रवेधेन तस्मिन् काले शूद्राणां स्थितिरपि स्पष्टा भवति। एतेषां राज्ञानां कृते शूद्राः कथं क्रीडनकसदृशा आसन्, इत्यस्यास्ति निदर्शनोऽयं वेधः।

वृषलं सम्मुखं कृत्वा पत्रं वक्षसि विन्यसेद्।
तदेव तिर्यग्मोक्षणेन बाणपुङ्खेन धारयेत्॥
पत्रच्छेदमिदं चित्रं चित्तभ्रान्तिकरं नृणाम्।
रसं विस्मयमातन्वन् दर्शयेद् वेधमुत्तमम्॥[11]

४. यमलार्जुनवेधः -

सकृदेव सन्धिताभ्यां बाणाभ्यां लक्ष्ययुग्मकम् यदा वेधयेत् सः वेधः उच्यते यमलार्जुनवेधः। द्वयाणां लक्ष्याणाम् सकृदेव वेधकारणाद् अयं यमलवेध उच्यते।

एकसन्धान युक्ताभ्यां बाणाभ्यां लक्ष्ययुग्मकम्।
विध्यन् प्रदर्शयेच्चित्रं यमलार्जुनसंज्ञकम्॥[12]

५. विकटार्जुनवेधः -

सकृदैव मुञ्चिताभ्यां बाणाभ्यां उपरिस्थितस्य तथा अधः स्थितस्य च लक्ष्यस्य वेधनं विकटार्जुनवेधः उच्यते। अस्मिन् वेधे उभाभ्यां लक्ष्याभ्यां वेधः एकदैव सन्धारिताभ्यां बाणाभ्यां भवति, न तु पृथक् –पृथक्।

अत ऊर्ध्वं स्थितं लक्ष्यमेकमोक्षणयोः बाणयोः।
विकटार्जुनकं चित्रं नृपो विध्यन् विनोदयेत्॥ [13]

[11] तत्रैव.
[12] तत्रैव.
[13] तत्रैव.

**६. अर्धचन्द्राह्वय वेधः -**

**अंगुष्ठेन तथा तर्जन्या गृहीतं चतुरङ्गुलपरिमाणात्मकं तृणं राजा एवं वेधयति येन हस्ते, अङ्गुल्याम्, अङ्गुष्ठे वा आघातः न भवति, अपितु तृणच्छेदनमात्रं भवति । इत्युच्यते अर्धचन्द्राह्वयवेधः । अस्य वेधनस्य प्रदर्शनं राजा सभासदां समक्षे कुर्याद् इति निर्देशः ।**

**अर्धचन्द्राकृती कृत्वा तर्जन्यङ्गुष्टकौ ततः ।**
**तृणकाण्डं तयोरग्रे धारितं चतुरङ्गुलम् ॥**
**अङ्गुल्यनुपपातेन तद् विध्यन् पृथिवीपतिः ।**
**अर्धचन्द्राह्वयं चित्रं दर्शयेच्च सभासदाम् ॥**[14]

**७. मालाविद्याधरः वेधः -**

**एकस्य बाणस्याग्रे अन्यमेकं बाणं संयुज्य, उभाभ्यां बाणाभ्यां दूरे स्थितं, समीपे च स्थितं लक्ष्यं राजा वेधयति । इति मालाविद्याधर उच्यते । वेधोऽयं दुःसाध्यः यतोहि उभयोः इषवोः लक्ष्यमेकमेव भवति, तथा बाणस्य आकारे द्विगुणतापि सञ्जायते येन धनुषि स्थापनं दुष्करं भवति ।**

**सन्धतः सायकस्त्वेको द्वितीयः सम्मुखः स्थितः ।**
**द्वावेतौ मोक्षेण पुरः पश्चाच्च गच्छतः ॥**
**पूर्वापरस्थितं लक्ष्यं प्रविध्यन्नवनिपतिः ।**
**मालाविद्याधरं चित्रं दर्शयेच्चत्रवेष्टितम् ॥**[15]

**<u>शब्दवेधित्वम्</u> -**

**शब्दवेधः यद्यपि पृथक्तया धनुश्शास्त्रे वर्णितमस्ति, तथापि अस्य स्वरूपेण अयमपि चित्रवेधः इति वक्तुं शक्यते । अस्मिन् वेधे न लक्ष्यं दृश्यते अपितु ध्वनिमात्रं धन्विना श्रूयते । ध्वनिना एव लक्ष्यं**

---
[14] तत्रैव.
[15] तत्रैव

चिन्तयित्वा वेध्यते । शब्दवेधस्योदाहरणन्तु रामायणे श्रवणवधप्रसंगे वर्णितमस्ति यत्र राज्ञा दशरथेन श्रवणः जलभरणकाले घटकृतशब्दं बालहस्तिनः अनुमान्य हतः । अनेनैव निर्दोषवधेन दशरथस्य पुत्रवियोगमरणं श्रवणपित्रा शापितम् । अस्य शब्दवेधस्याभ्यासः धनुश्शास्त्रे इत्थं वर्णितमस्ति - यत्रलक्ष्यं स्थापितं भवति तस्माद् हस्तद्वयान्तरे कांस्यपात्रं स्थापयेद्, तत्रैव स्थित्वा अन्यः जनः तं कांस्यपात्रं लक्ष्यीकृत्य शर्करादिभिः ताडयेत् । तेन ताडनेन यः शब्दः जायते, तं श्रुत्वा धन्वी तत्रैव स्वचित्तं स्थापयेद् । कर्णेन्द्रियस्य तथा मनसः योगं कृत्वा लक्ष्यानुमानं कुर्यात् तथा शरेण लक्ष्यं वेधयेत् । अनयैव विधिना वारं वारम् अभ्यासं कृत्वा शब्दवेधस्य सिद्धिर्जायते । यदा हस्तद्वयानतरे स्थितेन काँस्यपात्रेण लक्ष्यानुमानं निश्चितं भवेत् तदा ततः दूरे-दूरे लक्ष्यं संस्थाप्य अभ्यासं कुर्यात् । अनेनाभ्यासेन शब्दवेधं सिध्यते ।

लक्ष्यस्थाने न्यसेत् कांस्यपात्रं हस्तद्वयान्तरे ।
ताडयेच्छर्करादिभिस्तच्छब्दः सञ्जायते यदा ॥
यत्र चैवोद्यते शब्दस्तं सम्यक् तत्र चिन्तयेत् ।
कर्णेन्द्रियमनोयोगाल्लक्ष्यं निश्चीयतां नयेत् ॥
पुनः शर्करया तच्च ताडयेच्छब्दहेतवे ।
पुनर्निश्चीयतां नेयं शब्दस्थानानुसारतः ॥[16]

उपसंहारः -

सामान्यतया दर्शनेन प्रतीयते यत् चित्रवेधानामुद्देश्यं मनोरञ्जनमात्रमेवास्ति । किन्तु एतेषाम् केचन विशेषप्रभावा अपि भवन्ति ।

१. एभिः बालकानां शस्त्राभ्यासे रूचिरेधते । यतोहि पुनः पुनः एकेनेव लक्ष्याभ्यासेन अभ्यासकार्ये रुचिः समाप्यते । एतादृशैः लक्ष्याभ्यासैः अभ्यासकार्ये रमणीयता जायते ।

[16] वशिष्ठधनुर्वेदसंहिता, २/६५-६६-६७. संपा. शास्त्री, द्वारकाप्रसाद. पृ. ३५-३६.

२. एभिः धनुश्शास्त्रस्य लोकरूपता सिध्यते । शास्त्रस्य परमं प्रमाणं लोकमेव, लोकानुरूपतया च शास्त्रस्य दीर्घसूत्रता सिध्यते । एतादृशैः चित्रवेधैः धनुश्शास्त्रं लोकप्रचलितं भवति ।

३. चित्रवेधानाम् आधुनिकसमयेऽपि प्रासंगिकता दृश्यत एव । एभिः प्रतियोगितादय आयोक्तुं शक्यन्ते । एतासु प्रतियोगितासु प्रतिभागिनः स्व-स्व चित्रवेधकौशलं प्रदर्श्य सम्मानं पुरस्कारञ्च प्राप्तुं शक्नुवन्ति ।

उपसंहारे कथयितुं शक्यते यत् आधुनिकसंस्कृतशोधक्षेत्रे धनुश्शास्त्रस्य स्थानं नगण्यमेव दृश्यते । अतः भारतस्य प्राचीना तथा समृद्धा एषा परम्परा विलुप्तिं गच्छति । मूलग्रन्थानां प्राप्तिर्तु नैव भवति, यदुपलभ्यते तस्यापि पठनं पाठनं नैव भवति । शास्त्रस्यास्य ग्रहणं यदि आधुनिक संस्कृतशिक्षणे भवेत् तदैवास्य महत्त्वं, वार्तमानिकं च उपयोगं जनानां समक्षे आगच्छेत् ।

इति

UGC CARE 1